# ISWK SHARING KNOWLEDGE

## Class - VIII

## Subject- Sanskrit 3rd Language

## Topic-

# पाठः - अस्माकं विद्यालयः


- By- Acharya Sushil Sharma


©ISWK

# अस्माकम् विद्यालयः



गौरवः – सौरभ! अद्य अहं त्वां निजविद्यालयं नयामि।

सौरभः – भवतु! तव विद्यालयः कुत्र अस्ति?

गौरवः – मम विद्यालयः उद्यानस्य समीपे एव अस्ति। वयं पादाभ्याम् एव तत्र गच्छामः।

सौरभः – शोभनम्। आवाम् अपि तत्र गच्छावः।

कणिका – भ्रातः! अहम् अपि त्वया सह गच्छामि।

गौरवः – अस्तु! शीघ्रं चल।

*(सर्वे विद्यालयं गच्छन्ति)*

गौरवः – अयम् अस्माकं विद्यालयः अस्ति। अत्र चतुस्सहस्रं छात्राः पठन्ति।

सौरभः – तव विद्यालये कति अध्यापकाः सन्ति?

गौरवः – मम विद्यालये द्विशतम् अध्यापकाः अध्यापिकाः च पाठयन्ति।

सौरभः – तव विद्यालयः अति सुन्दरः अस्ति। एषः विशालः अपि अस्ति।

कणिका – पश्य, तत्र एकम् उद्यानम् अपि अस्ति।

सौरभः – आम्! सुन्दराणि पुष्पाणि अपि विकसन्ति। गौरव! त्वं विद्यालये किं किं करोषि?

गौरवः – अहं विद्यालये पठामि, लिखामि, धावामि, क्रीडामि नृत्यामि च। मम मित्राणि अपि अत्र पठन्ति। वयं सर्वे प्रसन्नाः भवामः।

कणिका – सौरभ! अस्माकं विद्यालये वार्षिकोत्सवः अभवत्। तत्र एकस्मिन् नाटके गौरवः निजमित्रैः सह अभिनयम् अकरोत्। अहम् अपि नृत्यम् अकरवम्।

सौरभः – साधु! किं त्वं तरणताले तरसि?

गौरवः – न, न। अहं तु न तरामि परं मम मित्राणि तरन्ति। कणिका अपि तरणं जानाति। अधुना ग्रीष्मावकाशे अहम् विद्यालयम् आगत्य तरणस्य अभ्यासं कर्तुम् इच्छामि।

सौरभः – युष्माकं विद्यालयः शोभनः अस्ति। अधुना सूर्यास्तः भवति। वयं शीघ्रं गृहं चलामः।

(सर्वे गृहं गच्छन्ति)



## शब्द-शक्तिः (Word Meanings)

| | | | | | |
|---|---|---|---|---|---|
| नयामि | – (मैं) ले जाता हूँ | (I) carry | कति | – कितने | how many |
| पादाभ्याम् | – दो पैरों से | with two feet | द्विशतम् | – दो सौ | two hundred |
| चतुस्सहस्त्रम् | – चार हज़ार | four thousand | तरणताल | – तैरने का तालाब | swimming pool |

# अभ्यास

सम्प्रति लेखनीयम्

1. पूर्णवाक्येन उत्तरत । (Answer in a complete Sentence)

उदाहरणम् - ***तव*** विद्यलये ***कति*** अध्यापका: सन्ति ? मम विद्यालये ***द्विशतम्*** अध्यापका: सन्ति ।

(क) ***तव*** विद्यालस्य नाम ***किम्*** अस्ति ?

........................................ ।

(ख) ***तव*** विद्यालये ***कति*** छात्रा: सन्ति ? ....................................... ।

(ग) ***युष्माकं*** विद्यालये संस्कृतस्य ***कति*** अध्यापका: सन्ति ?

.................................................. ।

(घ) ***त्वं*** विद्यालये ***किं किं करोषि*** ? ................................... ।

(ङ) ***किं त्वं*** तरणम् जानासि ? ..............................................।

2. निम्नलिखितशब्दानां विपरीतार्थान् मञ्जूषायाः चित्वा लिखत । (Choose and write the proper antonyms of the words given blow from the box).

**दूरे, निर्गत्य, शनैः, असुन्दरः, अप्रसन्नः, तदा, लघुः, सूर्योदयः ।**

(क) शीघ्रम् - .......................... (ख) समीपे - ..................... (ग) विशालः - .......................

(घ) आगत्य - .......................... (ङ) सुंदरः - ..................... (च) प्रसन्नः - .......................

(छ) सूर्यास्तः - ......................... (ज) अधुना - ...................... ।

3. **वाक्यानि शुद्धानि कुरुत । ( Correct the sentences)**

**उदाहरणम् -** यूयं पठितं विद्यालयं ***गच्छन्ति*** । यूयं पठितं विद्यालयं ***गच्छथ*** ।

(क) राजीवः संजयः च विद्यालये ***क्रीडन्ति धावन्ति*** च । .......................................... ।

(ख) अस्माकं विद्यालयः विशालः सुन्दरः च ***असि*** । ................................................. ।

(ग) त्वं गृहं गत्वा जलं ***पिबति*** । ............................................. .... ।

(घ) भवान् अद्य किम् ***करोषि*** । ................................................. ।

(ड.) आवाम् उद्याने एव ***तिष्ठथः*** । ...........................................

# भाषा - अवबोधानम्

1. क्रियाया: उचितरूपेण रिक्तस्थानानि पूर्यताम् । (Fill in the blanks with appropriate verbs)

(क) अध्यापका: छात्रान् ...........। (पाठ+य)

(ख) नद्य: पर्वतात् ........... । (उत्+भू)

(ग) अश्व: क्षेत्रे तीव्रं ................ । (धाव्)

(घ) सेविका वस्त्राणि ...........। (क्षाल्)

(ङ) सूर्य: सायंकाले अस्तं ...........। (गम्)

(च) खगौ वृक्षे ....................। (स्था)

2. निर्देशानुसारम् वचनं परिवर्त्य वाक्यानि पुन: लिखत । (Change the sentences as directed and rewrite them)

उदाहरणम् - त्वं भोजनं खादित्वा **क्रीडसि** । (द्विवचने) युवां भोजनं खादित्वा **क्रीडथ:** ।

(क) अहं त्वां विद्यालयं नयामि । (बहुवचने) ........................................।

(ख) तत्र एकम् उद्यानम् अस्ति । (द्विवचने) ....................................।

(ग) सुन्दराणि पुष्पाणि अपि विकासन्ति । (एकवचने) ..................................।

(घ) वयं विद्यालये पठाम: क्रीडाम: च । (द्विवचने) .....................................।

(ङ) मम मित्रं तरणताले तरति । (बहुवचने) .....................................।

### 3. सन्धिं सन्धिच्छेदं वा कुरुत । (Join or disjoin the words.)

(क) विद्या + आलयः - .............. ।
(ख) ग्रीष्म + अवकाशः - .............. ।
(ग) वार्षिक + उत्सव - ................।
(घ) सूर्य + अस्त: - ...............।
(ङ) सूर्योदय: - ......... + ......... ।
(च) देवालयः - ....... + ........ ।
(छ) आयताकार: - ........... + .......... ।
(ज) लघूत्सवः - ....... + ....... ।

### 4. शब्दार्थमेलम् कुरुत । ( Match the words with their correct meanings)

| | |
|---|---|
| **(क)** पादाभ्याम् | (i) तैरने का तालाब |
| (ख) तरणताल | (ii) कितने |
| (ग) चतुस्सहस्रम् | (iii) आकर |
| (घ) आगत्य | (iv)दो पैरों से |
| (ङ) कति | (v) चार हजार |

## मूल्यपरकम्

1. किं त्वं विद्यालयं गत्वा पठसि अथवा समयं वृथा करोषि ? (क्या तुम विद्यालय जाकर पढ़ते हो या समय नष्ट करते हो ?)
2. सूर्यास्ते त्वं गृहम् आगच्छसि अथवा क्रीडसि ? (सूर्य अस्त होने के बाद तुम घर आ जाते हो या खेलते रहते हो ?)

# उत्तर {अभ्यास कार्य}

## सम्प्रति लेखनीयम्

1. पूर्णवाक्येन उत्तरत । (Answer in a complete Sentence)

(क) ***मम*** विद्यालास्य नाम ***भारतीय विद्यालयः अल वादी अल कबीर*** अस्ति ।

(ख) ***मम*** विद्यालाये ***चतुः सहस्रम्म*** छात्राः सन्ति ।

(ग) ***अस्माकं*** विद्यालये संस्कृतस्य ***चत्वारः*** अध्यापकाः सन्ति ।

(घ) ***अहं*** विद्यालये ***पठामि, लिखामि, धावामि, क्रीडामि नृत्यामि च ।***

(ङ) ***न, न, अहं*** तरणम् ***जानामि*** ।

**2. .** निम्नलिखितशब्दानां विपरीतार्थान् मञ्जूषायाः चित्वा लिखत ।

(क) शीघ्रम् - शनैः (ख) समीपे - दूरे (ग) विशालः - लघु (घ) आगत्य - निर्गत्य

(ङ) सुंदरः - असुन्दरः (च) प्रसन्नः - अप्रसन्न (छ) सूर्यास्तः - सूर्योदयः (ज) अधुना - तदा ।

**3. वाक्यानि शुद्धानि कुरुत । ( Correct the sentences)**

(क) राजीवः संजयः च विद्यालये ***क्रीडतः धावतः*** च ।

(ख) अस्माकं विद्यालयः विशालः सुन्दरः च ***अस्ति*** ।

(ग) त्वं गृहं गत्वा जलं ***पिबसि*** ।

(घ) भवान् अद्य किम् ***करोति*** ।

(ङ.) आवाम् उद्याने एव ***तिष्ठावः*** ।

भाषा - अवबोधानम्

## 1. क्रियाया: उचितरूपेण रिक्तस्थानानि पूर्यताम् । (Fill in the blanks with appropriate verbs)

(क) अध्यापका: छात्रान् पाठयन्ति ।
(ख) नद्य: पर्वतात् उद्भवन्ति ।
(ग) अश्व: क्षेत्रे तीव्रं धावति ।
(घ) सेविका वस्त्राणि क्षालयति ।
(ङ) सूर्य: सायंकाले अस्तं गमिष्यति ।
(च) खगौ वृक्षे तिष्ठत: ।

2. निर्देशानुसारम् वचनं परिवर्त्य वाक्यानि पुन: लिखत । (Change the sentences as directed and rewrite them)

(क) वयं त्वां विद्यालयं नयाम: ।
(ख) तत्र द्वे उद्याने स्त: ।
(ग) सुन्दरं पुष्पम् अपि विकासति ।
(घ) आवां विद्यालये पठाव: क्रीडाव: च ।
(ङ) मम मित्राणि तरणताले तरन्ति ।

**3. सन्धिं सन्धिच्छेदं वा कुरुत ।** (Join or disjoin the words.)

(क) विद्‌यालयः
(ख) ग्रीष्मावकाशः
(ग) वार्षिकोत्सव:
(घ) सूर्यास्त:
(ङ) सूर्य + उदय:
(च) देव + आलय:
(छ) आयत: + आकार:
(ज) लघु + उत्सव:

**4. शब्दार्थमेलम् कुरुत । ( Match the words with their correct meanings)**

**(क)** पादाभ्याम् - (iv) दो पैरों से
(ख) तरणताल - (i) तैरने का तालाब
(ग) चतुस्सहस्रम् - (v) चार हजार
(घ) आगत्य - (iii) आकर
(ङ) कति - (ii) कितने

## मूल्यपरकम्

**1. न, न अहं विद्‌यालयं गत्वा पठामि, समयं वृथा न करोमि ।**
**2. सूर्यास्ते अहं गृहम् आगच्छामि ।**

# गृहकार्यम्   { Home work }

सुलेख – { Write in notebook}

गौरव: - सौरभ: ! अद्य: अहं  To  कनिका - -- उद्यानम् अपि अस्ति l {Page 11}

शब्द - शक्ति {word meaning} Page 12

## अभ्यास

सम्प्रति लेखनीयम – {page 13 &14} प्रश्न - 1 एवं 3

भाषा अवबोधनम् – {Page 14} प्रश्न - 3 एवं 4

मूल्यपरकम् {Page 15} प्रश्न – 1, 2

# धन्यवाद: